# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**– शास्त्री (SEM-5) | **प्रश्नपत्रम्**–५ (New & Old) | **गुणाः** – ७० |
| **विषयः** – पुराणेतिहासः | **कोड**- **CC- 2-5-9** | **समयः** – १० तः १ |
| **दिनाङ्कः** – ०८/१२/२०१८ | **सन्दर्भग्रन्थः**- श्रीमद्भागवतम् – २/८ स्कन्धौ | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ श्लोकद्वयं सप्रसङ्गं व्याख्यायताम् ।** **१०**

१. इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
अधीतवान् द्वापरादौ पितुर्द्वैपायनादहम् ॥

२. यज्ञं यजेद् यशस्कामः कोशकामः प्रचेतसम् ।
विद्याकामस्तु गिरिशं दाम्पत्यार्थं उमां सतीम् ॥

३. स चिन्तयन् द्वयक्षरमेकदाम्भस्युपाश्रृणोद्विगदितं वचो विभुः ।
स्पर्शेषु यत्षोडशमेकविंशं निष्किञ्चनानां नृप यद् धनं विदुः ॥

**प्र-२ कस्याप्येकस्योत्तरं विस्तारेण ददातु ।** **१०**

१. भगवतः विराट्–स्वरूपवर्णनम् ।

२. भागवतस्य दशलक्षणानि ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ श्लोकद्वयं सप्रसङ्गं व्याख्यायताम् ।** **१०**

१. तमीहमानं निरहङ्कृतं बुधं निराशिषं पूर्णमनन्यचोदितम् ।
नृञ्छिक्षयन्तं निजवत्म संस्थितं प्रभुं प्रपद्यैऽखिलधर्मभावनम् ॥

२. अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकाण्ड निमित्तजन्मा ।
अन्तः समुदऽनुपचन् स्वधातुन् प्रसीदतां नः स महाविभूतिः ॥

३. विरक्तः कामभोगेषु शतरूपापतिः प्रभुः ।
विसृज्य राज्यं तपस सभार्या वनमाविशत् ॥

**प्र-४ कस्याप्येकस्योत्तरं विस्तारेण ददातु ।** **१०**

१. गजेन्द्रभोक्षः ।

२. समुद्रमन्थनम् ।

## ॥ तृतीयान्वितिः ॥

**प्र-५ श्लोकद्वयं सप्रसङ्गं व्याख्यायताम् ।** **१०**

१. ज्ञानं चानुयुगं ब्रूते हरिः सिद्धस्वरूपधृक् ।
ऋषिरूपधरः कर्म योगं योगेशरूपधृक् ॥

२. तस्मादेतद्व्रतं भद्रे प्रयता श्रद्धया चर ।
भगवान् परितुष्टस्ते वरानाशु विधास्यति ॥

३. धर्माय यशसेऽर्थाय कामाय स्वजनाय च ।
पञ्चधा विभजन् वित्तम् इहामुत्र च मोदते ॥

**प्र-६ यथाग्रन्थं साधु वर्णयत ।** **१०**

१. वामनचरितम् ।

२. पयोव्रतविधानम् ।

## ॥ चतुर्थान्वितिः ॥

**प्र-७ दशानां लघूत्तराणि लिखत ।** **१०**

१. परीक्षितः प्रश्नः कीदृश आसीत्?

२. जनाः किम् पश्यन्नपि न पश्यन्ति?

३. यशस्कामः कं यजेत्?

४. कः वैयासकिः ?

५. अनन्तः कथं क्रौडीं तनुं (वराहस्वरूपम्) बिभ्रत्?

६. सुदर्शनम् कस्य देवस्य चक्रम्?

७. भगवता धन्वन्तरिणा कः वेद प्रवर्तितः?

८. द्वितीयस्कन्धे कति अध्यायाः सन्ति?

९. पुराणस्य कति लक्षणानि?

१०. गजेन्द्रमोक्षस्तुतिपाठस्य प्रशस्तः समयः कः ?

११. रैवतो नाम कतमो मनुः ?

१२. कः नागराजः?

१३. कः विषं जग्धुमारेभे?

१४. अष्टमस्कन्धे कति अध्यायाः?

१५. कः शफरीरूपम् (मत्स्यरूपम्) दधार?

--००--